**केन्द्रीय विद्यालय संगठन, कोलकाता संभाग**

KENDRIYA VIDYALAYA SANGATHAN, KOLAKATA REGION

**अर्ध वार्षिक परीक्षा / HALY YEARLY EXAMINATION, 2026-27**

कक्षा/ CLASS :**VII** — समय/ Time: **02:30 होरा:/ Hours**

विषय/ SUBJECT :**संस्कृतम् / SANSKRIT** — अधिकतम अंक/ Max. Marks: **60**

**निर्देशाः -** प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

1. खण्ड (क) अपठित-अवबोधनम् – **10** अङ्काः
2. खण्ड (ख) रचनात्मकं कार्यम् – **10**अङ्काः
3. खण्ड (ग) अनुप्रयुक्तव्याकरणम् – **20**अङ्काः
4. खण्ड (घ) पठित-अवबोधनम् – **20**अङ्काः
5. सर्वे प्रश्नाः अनिवार्याः सन्ति।

## खण्ड (क) अपठित-अवबोधनम् (10)

**प्रश्नः 1. अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत-**

एकदा काकः वनमध्ये उड्डीयमानः आसीत्। सः दूरस्थं जलाशयं दृष्ट्वा तत्र अगच्छत्। तस्य पिपासा तीव्रा अभवत्। जलाशये जलम् अल्पम् आसीत्। काकः अचिंतयत्–"कथं जलं प्राप्तुं शक्यते?" सः समीपस्थं शिलाखण्डं दृष्ट्वा, तानि जलाशये क्षिपन् आरब्धवान्। शनैः शनैः जलस्तरः उपरि आगच्छत्। काकः जलम् अपिबत्। सः अतिसन्तुष्टः अभवत्।

**(i) एकपदेन उत्तरत 1**×4=4

(क) काकः कुत्र उड्डीयमानः आसीत्? (ख) काकस्य का तीव्रा अभवत्?

(ग) काक: किम् अपिबत्? (घ) क: अतिसन्तुष्ट: अभवत्?

**(ii) पूर्णवाक्येन उत्तरत-**2x2=4

(क) जलाशये जलं कीदृशम् आसीत्? (ख) काकः जलं प्राप्तुं किम् अकरोत्?

**(iii)उचितं पदं चिनुत-**1x2=2

**(क)** "एकदा काकः वनमध्ये उड्डीयमानः आसीत् **।**" इत्यस्मिन् वाक्ये कर्तृपदं किम् ?

(i) एकदा (ii) उड्डीयमानः (iii) काकः (iv) आसीत्

(ख) गद्यांशे **प्रस्तरम्** इत्यस्य समानार्थकं किं पदं प्रयुक्तम् ?

(i) दूरस्थं (ii) अतिसन्तुष्टः (iii) जलाशये (iv) शिलाखण्डं

## खण्ड (ख) रचनात्मकं कार्यम् (10)

**प्रश्नः 2.अनुच्छेदे कोष्ठकेषु केचन धातवः दत्ताः सन्ति । 'स्म' इति अव्ययपदम् उपयुज्य अनुच्छेदं पुनः लिखन्तु । (½ x 12 = 6)**

कृषक : प्रतिदिनं कृषिक्षेत्रं .............. (गच्छ्)। जलसेचनं' ........... (कृ) । कीटानां निवारणार्थं जैवौषधं ........... '(स्थापय्)। सः कृषिकार्यं सम्यक् ........(ज्ञा) । अतः अन्ये कृषकाः संशयेन ........ '(पृच्छ्)। सः स्वाभिमानेन ....... (जीव्)। अतः 'अहं कृषकः भूमिपुत्रः' इति साभिमानं ........ (वद्)। सः क्षेत्रे गोमयं ......... (योजय्), न तु कृतकान् पदार्थान्। अतः व्रीहेः गुणवत्ता अधिका ........ (भव्)। जनाः जालपुटमाध्यमेन तस्य तण्डुलं ........ (क्रीण) । एवं तस्य परिवारस्य सर्वे जनाः कृषिकार्येण ससुख ......... (जीव्) । सः सर्वान् .......... (वद्) "कृषकः न दीनः न च दरिद्रः, परं सर्वेषां पोषकः" इति ।

**प्रश्नः 3. अधोदत्त चित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया चत्वारी वाक्येषु कुरुत । (नीचे दिए गए चित्र का वर्णन करके मञ्जूषा की सहायता से चार वाक्यों को लिखिए।) (1x4 = 4)**

**( बालकाः, उद्यानम्, खेलति, पठति,चटका ,कन्दुकम् ,वृक्षम, पुस्तकम् ,बालिका )**



## खण्ड (ग) अनुप्रयुक्तव्याकरणम् (20)

**प्रश्नः 4. कोष्ठक प्रदत्तं निर्देशानुसारं उचित धातुरूपेण रिक्त स्थानानि पूरयत। (कोष्ठक में दिए गए निर्देश के अनुसार उचित धातु रूप से रिक्त स्थानों की पूर्ति कीजिए ।) 1x5 = 5**

**(i)** प्रजाः सर्वकाराय धनं ......। (दा, लट्लकारे)
**(ii)** उष्ट्रः तुङ्गः मन्दं ........। (गम्, लट्लकारे)
**(iii)** सर्वत्र एतादृशः भावः ......। (भू, लृट्लकारे)
**(iv)** अश्वाः वने ..............। (धाव् लट्लकारे)
**(v)** अहं गृहपाठं ........। (लिख्, लृट्लकारे)

**प्रश्नः 5.अधोलिखितानां पदानां विभक्तिं वचनं च लिखन्तु । 1x5 = 5**

| | विभक्तिः | वचनम् |
|---|---|---|
| (i) धनस्य | ................ | .................... |
| (ii) कलहेन | ................ | .................... |
| (iii) ज्ञानाय | ................ | .................... |
| (iv) राजसु | ................ | .................... |
| (v) शक्तिः | ................ | .................... |

**प्रश्नः 6.अधोलिखितानां पदानां स्त्रीलिङ्ग रूपाणि लिखन्तु । 1x6 = 6**

| | एकवचनम् | बहुवचनम् |
|---|---|---|
| (i) कृतवान् | ................ | ................... |
| (ii) लिखितवान् | ................ | ................... |
| (iii) ज्ञातवान् | ................ | ................... |
| (iv) हसितवान् | ................ | ................... |
| (v) खादितवान् | ................ | ................... |
| (vi) दत्तवान् | ................ | ................... |

**प्रश्नः 7.कोष्ठके विद्यमानानां शब्दानां चतुर्थी विभक्तेः रूपाणि प्रयुज्य वाक्यानि पुनः लिखन्तु-1x4=4**

**यथा- सैनिकः (देशं) जीवनं प्रयच्छति।**

**सैनिकः देशाय जीवनं प्रयच्छति।**

(i) माता **(याचक)** वस्त्रं ददाति। ....................

(ii)त्वं **(मित्र)** पुष्पं ददासि। ...................

(iii)देवः **(भक्त)** आशीर्वादं ददाति। ...................

(iv) पिता( **सेवक**) वेतनम ददाति। ...................

## <u>खण्ड (घ) पठित-अवबोधनम् (20)</u>

**प्रश्नः 8.अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5**

नागार्जुनः प्रसिद्धः रसायनशास्त्रज्ञः चिकित्सकः च आसीत्। सः अहोरात्रं प्रयोगशालायां कार्यं करोति स्म। एकदा सः महाराजं निवेदितवान्- 'महाराज! मम चिकित्साकार्याय एकः सहायकः आवश्यकः'

इति। राजा एतद् अङ्गीकृतवान् उक्तवान् च- ‘अस्तु अहं व्यवस्थां करोमि। श्वः केचन् योग्याः युवकाः आगमिष्यन्ति। भवान् परीक्षां कृत्वा तेषु युवकेषु कमपि योग्यं स्वीकरोतु’ इति। अन्यस्मिन् दिने द्वौ युवकौ आगतवन्तौ। नागार्जुनः द्वयोः विद्याभ्यासविषये पृष्टवान्। द्वयोः अपि विद्याभ्यासविषयः समानः एव आसीत्। तदा नागार्जुनः तौ एकं विशिष्टं रसायनं निर्माय आगच्छताम् इति सूचितवान्। तदर्थं दिनद्वयस्य अवसरं दत्तवान् । दिनद्वयानन्तरं नागार्जुनस्य समीपे प्रथमः युवकः आगतवान्। “ औषधनिर्माणे किमपि कष्टं न अभवत् खलु ?” इति नागार्जुनः पृष्टवान् । युवकः स्वनिष्ठां दर्शयितुं स्वगृहस्य समस्याः वर्णितवान्- “ पितुः उदरवेदना, मातुः ज्वरः च आसीत्। तथापि अहं तत्सर्वं परित्यज्य औषधं निर्मितवान् ” इति उक्त्वा नागार्जुनाय रसायनं दत्तवान् ।

**1.एकपदेन उत्तरत--** **1**×2=2

(i) चिकित्सकः कः आसीत्?

(ii)सः कदा प्रयोगालायां कार्यं करोति स्म ?

**2.पूर्णवाक्येन उत्तरत-** **1x1**=1

(i) नागार्जुनः युवकौ किं पृष्टवान् ?

**3.निर्देशानुसारम् उत्तरत - 1x2 = 2**

(i) “एकदा सः महाराजं निवेदितवान् ” अत्र क्रियापदं किं प्रयुक्तम् ?

(क) एकदा (ख) सः (ग) निवेदितवान्

(ii) त्यक्त्वा’ इति अर्थे किं पर्यायपदं अत्र प्रयुक्तम् ?

(क) परित्यज्य (ख) व्यवस्था (ग) चिकित्सा

**प्रश्नः 9.अधोलिखितं पद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 1x5 = 5**

**काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।**
**व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥**

**1. एकपदेन उत्तरत। 1x2 = 2**

(i) केषां समयः काव्यशास्त्र विनोदेन गच्छति ?

(ii) केषां समयः व्यसनेन गच्छति ?

**2. पूर्णवाक्येन उत्तरत । 1x1 = 1**

(i) मूर्खाणां समयः ‘कीदृशेन गच्छति ?

**3. भाषिक कार्यम् । 1x2 = 2**

(i) ‘बुद्धिमताम्’ इति पदस्य समानपदं किम् आगतम् ?

(क) मूर्खाणां (ख) धीमताम् (ग) गच्छताम्

(iii) 'मूर्खाणां समयः व्यसनेन गच्छति' अस्मिन् वाक्ये क्रियापदं किम् ?

(क) व्यसनेन (ख) गच्छति (ग) मूर्खाणां

**प्रश्नः 10. उचितान् वाक्यांशान् परस्परं संयोजयन्तु । 1x4 = 4**

| (क) | (ख) |
|---|---|
| तदा वृत्तिश्च कीर्तिश्च | पञ्चैतानि शनैः शनैः |
| शनैर्विद्या शनैर्वित्तं | निर्गन्धा इव किंशुकाः |
| न चोरहार्यं न च राजहार्यम् | यदा विद्या भवेत्तव |
| विद्याहीना न शोभन्ते | न भातृभाज्यं न च भारकारि |

**प्रश्नः 11. रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुर्वन्तु - 1x6 =6**

(i) राजा पृथिव्याः भूषणं भवति ।

(ii) साधोः विद्या ज्ञानाय भवति ।

(iii) विद्या गुरूणां गुरुः ।

(iv) ते मर्त्यलोके भुवि भारभूताः भवन्ति ।

(v) विद्याहीनाः न शोभन्ते ।

(vi) सर्वस्य लोचनं शास्त्रम् ।

*****